हरिसं· श्रीसहजानंदस्वामिनेनमः॥ सेवध्वमध्वरभुजामपिमाननीयांवाचंकृतश्रीलनपरस्यमतीप्रदात्रीम्॥ तांवर्णिनोभ सर्ग·५
॥१॥ गवतःप्रकृतस्ययोगात्पीयूषमाकलयतींजलसाम्ययोगं॥१॥ पूर्वसर्गेधर्मदेवरामानंदमुनिसमागमंसंक्षेपेणो
क्तंसविस्तरमनुवर्णयिषिषुरत्रपंचमसर्गेकविराजआदौश्रीरामानंदमुनिप्रादुर्भावंप्रस्तौतिअथेतिअथ
धर्मदेवरामानंदसमागमोक्त्यनंतरं कृष्णस्यपदारविंदेचरणकमलेतयोःप्रसक्तचित्तमेवभ्रमरोयस्यतस्य
जनैर्लोकैःप्रार्थितंदर्शनमीक्षणंयस्यतस्यउद्धवस्यावतरोऽवतारभूतस्तस्यअवतरणमवतरः ऋदोरविस्पृ

अथोद्धवस्यावतरस्यतस्यजनुर्जनप्रार्थितदर्शनस्य॥ द्विजान्वयेकृष्णपदारविंदप्रसक्तचित्तभ्रमरस्यवच्मि॥१
ऋग्वेदधारीश्रुतिपारयायीविप्रोऽजयःकाश्यपगोत्रजातः॥ आसीदयोध्यानगराधिवासःकृष्णेष्टदेवोनिजधर्म
निष्ठः॥२॥ तस्यरामानंदमुनेःद्विजस्यब्राह्मणस्यअन्वयःसंततिर्वंशइतियावत् संततिर्गोत्रजननकुलान्यभि
जनान्वयौवंशोऽन्ववायःसंतानइत्यमरः तस्मिन्ब्राह्मणवंशेइत्यर्थः जनुरुद्भवंजनुर्जननजन्मानिजनिरुत्पत्ति
रुद्भवइत्यमरः वच्मिकथयामिसंप्रदायमूलत्वात्तस्येतिभावः उपेंद्रवज्रावृत्तम् उपेंद्रवज्राजतजास्ततोगौरि
तितल्लक्षणात्॥१॥ ऋगिति अयोध्यानगरमधिवासोनिवासस्थानंयस्यसः पाठांतरे अयोध्यानगरमधिवस ॥१॥

तीतिनंदिग्रहिपचादिभ्योल्युणिन्यचइतिणिनिःप्रत्ययः कृष्णइष्टदेवोयस्यसः निजआत्मीयोधर्मोवर्णाश्रमोचितः
सदाचारस्तत्रनितरांतिष्ठतीतिआतश्चोपसर्गेइतिकः आतोलोपइटिचेत्याकारलोपः उपसर्गात्सुनोतिसुवती
त्यादिनाषत्वं ऋक्समयजुःकोवेदः ऋग्वेदस्तद्धारीऋग्वेदीत्यर्थः शाकपार्थिवादित्वादुत्तरपदलोपिसमासः पा
ठांतरे ऋग्वेदस्यपाठोऽध्ययनमस्यास्तीतिअतइनिठनावितीनिःप्रत्ययः श्रुतानिशास्त्राणितेषांपारमंतंयाती
तिग्रहादित्वात्णिनिः पारंपरस्तटेप्रांतइतिमेदिनी काश्यपगोत्रेजातःप्रादुर्भूतःअजयःअजयनामधेयःविप्रो

तदीयपत्न्यांकमलतोमनीषीत्र्यग्रांकशैलेंदुमितेसवर्षे॥ प्रगोऽष्टमीसंज्ञतिथौवलक्षेपक्षेनभोमासिजनिंप्रपेदे
३॥ द्विजःआसीद्बभूव इंद्रवज्रावृत्तम्स्यादिंद्रवज्रायदितौजगौगः॥२॥ तदीयेति त्र्यग्राःपंचअकानवशैलाःस
प्तइंदुरेकस्तैर्मितेसंवत्सरेपंचदशपंचनवतीतमेवर्षे वर्षोऽस्त्रीभारतादौचजंबूद्वीपाब्दवृष्टिष्वितिमेदिनी नभोमा
सिश्रावणेमासिश्रावणेतुस्यान्नभाःश्रावणिकश्चसइत्यमरः वलक्षेधवलेपक्षेवलक्षोधवलोऽर्जुनइत्यमरः प
क्षोमासार्धकइतिमेदिनीपक्षत्राद्याःसांतोऽप्यस्ति तथाचपक्षसीचस्मृतोपक्षाद्वितिप्रभृतिकः अष्टमीसंज्ञायस्याः
साचासौतिथिस्तस्यांप्रपूरणीप्रियादिष्विति निषेधान्नपुंवद्भावः प्रगेप्रातःकाले प्रगेप्रातःप्रभातइत्यमरः

मनीषी पंडितः सरामानंदः तस्मत्प्रजनि विप्रस्येयं तदीया सचासौ पत्नी च तस्यां स्त्रियाः पुंवद्भावितपुंस्कादिसा
दिना पुंवद्भावः क्रमतोऽक्रमति संज्ञकायां जनिमुसत्तिं प्रपेदे प्राप्तः अनुप्राप्तः ॥ ३ ॥ वेदोक्तेति वेदेन निगमेन त
त्कायेसंस्कारागर्भाधानादयस्तैर्युतो युक्तः इत्त वेदोक्तसंस्कारइत्यर्थः योरामानंदोमुनिः प्राग्भवः प्राक्तनः सा
यं चिरं प्राह्णोपरागोऽप्रयेभ्यः इत्यादिना प्रागिस्यम्यातदुप्रसयः तस्य तुद्भुतुटः पूर्वं मनाद्देवाः मवासावभ्यास
श्रुतस्य बलं तेन हृदयेमे श्रीवसुदेवनंदनेनराकृतौ भगवति गरीयसी मतिर्गुर्वी प्रीतिः स्नेहं प्रयन्तः प्राप्तः सन् ।

वेदोक्तसंस्कारयुतः पूर्वजन्मोपः प्राक्तनाभ्यासबलेन कृष्णे ॥ गरीयसीं प्रीतिमनन्यभक्तिं चकार तस्माखिलपंकह
र्तुः ॥ ४ ॥ तत्राभिस्थितो नैष्ठिकवर्णिधर्मे विरक्त उदस्तात्मनिकेतनो यः ॥ रामानुजप्रापितकृष्णदीक्षः साक्षात्समी
क्ष्योज्झितसंन्यायस्तम् ॥ ५ ॥ अखिलानि निखिलानि यानि पंकानि पापानि यफुत्सखिलानां जनानां पंकानि
पापानि तेषां हर्तुर्विनाशकस्य तस्य श्रीकृष्णस्य अनन्यैकांतिकी वासौ भक्तिश्च स्त्रियाः पुंवदिसादिना पुंवद्भावः
तां भक्तिं श्रवणादिनवांगोपेतां दृढां मीभगवस्य साधारणप्रीतिलक्षणां चकार कृतवान् ॥ ४ ॥ तत्रेति तत्रा वत्रों
दियः नैष्ठिका आमरणं सत्काष्टविधस्त्री योगावर्णिनो ब्रह्मचारिणस्तेषां धर्मे स्वधात्री सागरूपे स्थितः वि ॥२॥

रक्तिर्वैराग्यं तेन उदस्तं सत्क्तं आत्मनिकेतं ग्रामगृहादिस्वस्थानं येन सः रामानुजेन लक्ष्मणाचार्येण प्रापिता
कृष्णमंत्रदीक्षा यस्य तथोक्तः यो रामानंदः तं कृष्णं साक्षात्प्रत्यक्षं यथास्यात्तथा स्वप्ने इति शेषः समीक्ष्यालोक्य
उज्झितास्त्यक्ताः संन्यायास्तु संभावनाद्यो येन तथाभूतः अभूदिति शेषः ॥ ५ ॥ सद्धतिपुण्यानि पवित्रता कर्तॄ
णियानि तीर्थानि गंगादीनि तेषु चरन् गच्छन् धरायां जगत्सां भूमावित्यर्थः धरा सर्वंसहा रसेति शब्दार्णवः ज
नान् लोकान् अकामान् सकलाकामनारहितान् पश्यसंसारासारताबोधनादिना साञ्जितकृष्णभजनाय काम

सपुण्यतीर्थेषु चरन्महात्मा तत्र नानकामानिविदधज्जनौघान् ॥ उपादिशंस्तीर्थमगात्प्रयागं भक्तिं भवोच्छेदसहां
चतेभ्यः ॥ ६ ॥ तत्राभवं तेन महत्तमेन लक्षेनापहस्तस्य महत्प्रसंगः ॥ समुल्लनेच्छोर्नितरादतस्मै कथां हरेराधिविघात
नीसः ॥ ७ ॥ नान् निष्कामान्वा विदधत् कुर्वन् महात्मा महानुभावः तेभ्यः पूर्वोक्तेभ्यो जनेभ्यः भवस्य संसारस्य उच्छेदो
विनाशस्तत्र सहां समर्थां भक्तिं श्रीकृष्णभजनरीतिं उपादिशन् उपदेशविषयतां प्रापयत् सरामानंदमुनिः प्र
यागं तीर्थराजं अगात् प्राप्तः ॥ ६ ॥ तत्रेति तत्र प्रयागतीर्थे महत्तमेन भगवदेकांतिकभक्त्यादिगुणैरतिमहताम
हां बकेनेति पाठे विशालनयनेनेत्यर्थः अंबकं नयनं दृष्टिरिति हलायुधः तेन पूर्ववर्णितेन श्रीरामानंदमुनिना

हरिसिं· सहसाकं साकं सार्द्धं समं सहेसमरः क्षेत्रागनक्षरकृतपीठाज्जनितातपहंती तितथोक्तः आपेक्षेत्रातमसोरि सर्ग-५
॥ ३ ॥ सपपूर्वार्द्धं तेर्डः प्रसंगः पद्मस्य समागमः आभवज्ञातः समुन्नतात्छायस्य समहापत्राद्सर्थः सरामानंदमुनिः
तस्मै धर्मदेवाय आधिमानसी मथां हंतुं त्रासमस्यास्तां तथोक्तां कष्टजातो तिनिस्ता च्छी त्वेद्ध तिद्दंते स्ताच्छी
त्मे तिनिः ह्नस्तो ऽविशालोशिति हं तेनस्पतकाराद्देवाः दोहंते शिति कुत्वं स्यादाधिर्मानसी सार्थे समरः कथां महा
नुभावमहाप्रतापश्रीकृष्णचरित्रकथनरूपां निजगादावहत् ॥ ७ ॥ तद्दिनि सधर्मदेवः नैत्रोनिनिशि भवेतत्र भव
तस्मादसेवाभिरतोदद्दर्शस्वप्नेत्रानैत्रोसुमहः सम्मूहम् ॥ विवेदतत्रपसमीक्ष्यहृद्यंमनोरमंदिव्यमहानुभावम् ॥ ८
इसणस्वप्नेस्वप्नावस्थायांमहःसुमहः कृमहोमनः प्रीतिजनकं तेजस्तस्य समूहं पुंजं ददर्श पश्यादितिन्नोषः तस्य
रामानंदमुनेः पादसेवायामभिरतो ऽसासक्तः सन् तत्रतेजः पुंजे दिव्योमहाननुभावोमहिमायस्य तं मनोरमंद
र्शनक्षणएव चित्तहारिणं कृष्णंकृष्णारव्यं श्रीवासुदेवं प्रसमीक्ष्यदृष्ट्वा कर्षतिभक्तजनमनांसि स्वमूर्त्तौ वि
तिक्षुसुसाल्ययमेवान्वर्थसंज्ञः कृष्ण इति विवेदाज्ञासीत् चतुर्थचरणेलावण्यपुष्टिमहनूंवदानमितियावे
लावण्येनपुसतेहृतिलावण्यपुकुदिव्याकंदराहनुर्यस्यसः वदानोवाग्मी सचासौसचासौसचतम् मुक्ताफ ॥ ३ ॥

लेषुछायायास्तरलत्वमिवांतरा प्रतिभातियदंगेषु तल्लावण्यमिहोच्यते इतिपालः दिव्यं वल्गुलवंगयोरि
तिविश्वः वदानस्ताग्मिवाग्मिनोरितिसज्जयः हनुः पुमानपरोगंडादितिवरकृचिः ग्रीवंसमानम् ॥ ८ ॥ तद्दितितस्य
रामानंदमुनेरैश्वर्यंतच्छितस्तोतदैश्वर्यविदोभक्तिधर्मौतस्यत्रिष्यतात्रिष्यभावस्तां प्राप्नुवतोप्रापस्तवौ हृत
तच्छिष्यतोतस्यरामानंदमुनेर्वदनेंदुर्मुखचंदुस्तस्मान्निर्येतियानिवचोमृतानिवचनामृतानितैः निर्देतिं
रूपवंतंगम्यमानोऽनित्रायनमल्लौतौप्राप्नुवंतोसंतो धातोरेकाचोहलादेरिसादिनागमेभूर्नुग्रार्थेपदः सम्य
तच्छिष्यतांतद्वदनेंदुनिर्यद्वचोमृतेर्निर्वृतिमाप्नुवंतौ ॥ जंगम्यमानौदितिनैरलक्ष्येस्थानेतदैश्वर्यविदोमवाप्ना
म् ॥ ९ ॥ भवच्छिदष्टाक्षररूपमंत्रं यमान्सताभ्यां नियमैरुपेतान् ॥ स्वसंप्रदायागमेनसार्द्धतदीयभक्तिंसमुपा
दिदेश ॥ १० ॥ इतोरितिच्छिलअभ्यासेवर्त्तसभ्यासकवोजत्वंनुगतोऽनुनासिकांतस्येसभ्यासस्यनुकनस्थापदं
तस्यकलीसनुस्वारः स्वरः नृत्तनृत्याननचारिसादिनापडः ताडूपेर्डदः स्थानेत्रानन्नादेशाः आनेमुगितिमुगागमः
इतिजैरस्करैः अलक्ष्येदर्शनानर्हेस्थानेएकांतस्थलइसर्थः मवांतानिवासंकृतवंतोवासंविधायसतस्यतुरि
सर्थः यथान्यात्मनः विक्षेपोनभवेत्तथाभगवत्कथाश्रवणतध्यानपरावास्तामिसर्थः ॥ ९ ॥ भवेतिसरामानं

रमुनिः स्वस्य यः संप्रदायः श्रीउद्धवाख्यसंज्ञकः तत्रोपास्यादेवतानदीक्षाविधिस्तत्कृष्णभगवदर्चनप्रकारइत्या
दिरूपं पारंपर्यं यस्यासौ पारंपर्यमाम्नायः संप्रदायो गुरुक्रम इति हैमे ऽभिधानचिंतामणौ नाममालायाम् आप्र
च्छनमथाम्नायः संप्रदायइत्यमरश्च हेगुरुपरंपरागतसदुपदेशस्येतिव्याख्याकृधासंप्रदानसंप्रदायः दा
नोघञ्युक्तौ तस्मात्वगमो बोधनं तेन सार्द्धं सहताभ्यां भक्तिधर्माभ्यां क्रियया यमभिप्रैति सःसंप्रदायमितिसंप्र
दानसंज्ञायां चतुर्थी संप्रदान इति चतुर्थी नियमैः शौचादिभिरुपेतान् युक्तान् यमान् हिंसादीन् भवं संसारं
प्रसेदिवांस्ताविति मच्छ्रितेषु भविष्यथो वामवदद्धरे ऽपि ॥ तेजस्विनो ज्ञाननिधिर्दयालुर्निजाश्रितानंदनल
ब्धवर्णः ॥११॥ छिनत्तीति भवच्छिद् अष्टाक्षराणि यस्य सः कृष्णस्य मंत्रः सचासौसचासौसचतं संसार
निवर्त्तकमष्टाक्षरं कृष्णमंत्रमित्यर्थः तदीयभक्तिं श्रीकृष्णभक्तिं च समुपादिदेश उपदिष्टवान् ॥१०॥ प्रसे
दिवानिति तेजः प्राणात्यये ऽपिस्येष्टेहेत्रपाद्धृतामाधिक्षेपाद्यसहनं विद्यते ययोस्तौ अधिक्षेपावमाना
देः प्रयुक्तस्य परेणायत्तु प्राणात्यये ऽप्यसहनं तत्तेजः समुदाहृतमिति भरतः गुणान्वितावितिपाठे गुणा
न्वितो भगवस्यसच्चरा हेतुभूतगुणयुक्तो वां युवां भक्तिधर्मौ मच्छ्रितेषु मदाश्रितेषु मत्संप्रदायं प्राप्तेष्विस ॥५॥

र्थः वरेण्यो श्रेष्ठो हजनगणप इत्येष प्रसयः भविष्यथः इत्यमुना प्रकारेण प्रसेदिवान्प्रसन्नः भाषायांयद
वसश्रुव इति प्रपूर्वात्सदेर्विहितस्य लिटः क्वसुरादेशः अतएकहल्मध्येनादेशादेर्लिटी सकारस्य एकारः
अभ्यासलोपश्च ज्ञानस्य निधिः दया विद्यते यस्यासौ निजाश्रितानां पदानंदनं प्रसन्नीकरणं तत्र लब्धवर्णो
विचक्षणः लब्धवर्णो विचक्षण इत्यमरः रामानंद मुनिः तौ भक्तिधर्मौ अवदत् उवाच ॥११॥ याहीति मदाश्रया
मन्निदेशेन जनेभ्यः कृष्णस्य संप्रदायाश्रयणं कुर्वन्ना लोकेभ्यः निर्गतः आतंको भयमात्राकावायस्य तस्यभा
याहि स्वर्गेहे च वनितासमेतो वासोपधर्मस्य भजस्व कृष्णम् ॥ मदाज्ञया कृष्णमनोर्जनेभ्यः कुर्वन्निरातंकत
योपदेशं ॥१२॥ वस्तन्नातथा आतंको भयमात्रांके समरः कृ[stain]मनोः कृष्णमंत्रस्य मनुर्मंत्रादिराजपो
रिति विश्वः उपदेशं कुर्वन् वनितया त्वया निस्नेहयुक्तयो यया समेतो युक्तः वनिताजनितासृर्थं राग
योविती समरः स्वर्गेहे स्वगृहे याहि गच्छ उपधर्मस्य पाषंडधर्मस्य वासात्तद्धेकारण प्रदुर्वासः स्या
त्स्त्रियां वास्तुः पुमानसरु दिति प्रुक्तरः वासास्याद्ध्यातमंडली तिहलदेहतिः ॥ गायन्नुगुणांस्तस्येतिपा
ठे ॥ तस्य कृष्णस्य गुणान् गायन् सन् कृष्णमभजस्व ॥१३॥

निर्व्याजेति निर्गतो व्याजः पदेशो मिषं यस्याः सा चासौ भक्तिः सेवा तया व्याजः शाठ्ये व्यपदेशे ऽथे इति मेदिनी
निष्कपटसेवया प्रीततरादतिप्रीतात् गुरोरात्मानंदात् अशेषं निःशेषं ज्ञानं भगवत्स्वरूपज्ञानं यथानि
देशं यथोपदेशं समुपेत्य प्राप्य गेहं स्वगृहं सम्यक्सुखेन सर्थः उपेयिवान् सो अधिजग्मिवान् सो उपेयिवानना
श्वाननूचानश्चेति निपातनसिद्धोयमुपेयिवच्छब्दः ततो भक्तिं धर्मोपक्रमस्य श्रीहरेर्भक्तिं नवधा श्रीहरेर्भक्तिं



निर्व्याजहृष्टात्समुपेयिवान्सो ज्ञानं गुरोः प्रीततरादशेषम्॥ यथानिदेशं समुपेत्य गेहं ततो चकार तुर्भक्तिमुरुक्रमस्य
॥१३॥ ततः शरण्यः शरणागतानां स विप्रमुख्यैर्बहुभिः स्वशिष्यैः॥ अभून्महाभूतिरदभ्रकीर्त्तिः सदंबरस्थादिभि
रर्च्यमानः॥१४॥ सुरद्विषस्तान्भुवामर्दयंतस्तस्मिंस्तदीयेष्वपि वैरवसात्॥ कोन्नादिजन्तुः किल तस्य भेजे दारिद्र्यदुः
खैः पिहरिं सधीरः॥१५॥ चकार तु॥१३॥ तत इति ततः स्वगृहप्राप्त्यनंतरं शरणागतानां शरण्यः शरणे साधुः तत्र
साधुरिति यत्प्रत्ययः बहुभिरसंख्यैः विप्राः द्विजा मुख्याः येषु तैः स्वशिष्यैः स्वतो दीक्षां प्राप्तैर्भक्तैः सह तियानि
वराप्तिवासांसिचयस्तं धृतं च तामादयो येषां तैरन्यादिभिः अर्च्यमानः पूज्यमानः अंबरं वाससि व्योम्नीति वि
श्वः अदभ्रा बहुला कीर्त्तिर्यस्य सः महती भूतिः समृद्धिर्यस्य सः भूतिर्भस्मनि संपदीत्यमरः अभूत् जातः॥१४॥ सुरेति त



स्मिन् धर्मे नदीयेष्वपि धर्मोश्रितेषु च वैरवत्वात् द्वेषस्य विद्यमानत्वात् तान् धर्मादीन् भुवामसं तं अर्दयंतः पीडयं
तः सुरद्विषो दानवाः तस्य धर्मस्य कोन्नादिरूप्यादिकार्थो घमकोद्रा कुद्दालेपात्रे दिशेस्व हुपिधानके ऽजा
तिको ऽन्नो ऽर्थे संघाते इति मेदिनी जन्तुः हन्तवंतः किल दारिद्र्यभावो दारिद्र्यं तत्संबंधिनि दुःखैः पिधीरः सः हरिं
भेजे भजतनतु साहः दुःखेपि जहाँ विसर्थः॥१५॥ द्विषदिति आत्मविदां आत्मनिष्ठानां वरीयान् अतिश्रेष्ठः स ध
र्मदेवः द्विषंतः सपत्नाः निमित्तं कारणं यस्याः सा चासौ विपत् तस्यैवानलो ऽग्निः स धिको वह्निः तस्य या ज्वाला तया आ

द्विषन्निमित्तापदनलवह्निज्वालाकुलांतःकरणामधीरां॥ जगाद तां बाष्पनिरुद्धदृष्टिं ससांत्वयन्नात्मविदांव
रीयान्॥१६॥ नम्रो ऽत्र मात्राय दिते विलोक्य रुष्टा भवेयुः कृतरां द्विषंतः धैर्येण सद्यं प्रतिकूलदैवाद्दुपागतं दुःख
मलंघनीयम्॥१७॥ कुलं विकुलमंतःकरणं यस्यास्तां सपत्नारिद्विषद्विपक्षाहितद्विदः समरः यतो धीरां महाप
द्दर्शनात् क्षुभितधैर्यगुणां अतएव बाष्पैरश्रुभिर्निरुद्धा दृष्टिर्यस्यास्तां तां भक्त्या आत्मपत्नीं सांत्वयन् सामवा
क्यैर्विखेदां कुर्वन् उत्तगाद उवाच॥१६॥ नेति हे अंगने अत्रापदि अस्मिन्नापत्काले ते तव नम्रो ऽसंत्वया त्रोकोनक
र्त्तव्यः कुर्न्हं कर्मणा हन्तीति कृत्येरिषेष्ठा यतः द्विषंतो दुर्हृदः विलोक्य कीदृशांतत्वयो रिदानीं व्याकुलत्वेति व्या

लक्ष्यकृतरामसेनं दृष्ट्वा हर्षिताः भवेयुर्भविष्यंति अतः पत्नीकृत्वा द्विपरीतो दैवाद्दूरदृष्टान् उपागतं प्राप्तं आतो
ऽलंघनीयमनुल्लंघनीयं कष्टं आमिलं कष्टमितियावत् धैर्येण चित्तस्थिरतारूपधीरतया स्थिरचित्तो नतिर्यो
नुतद्धैर्यमिति भूपालः सत्वं सोढव्येन तत्र आकुली भवितव्यं विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीरा इति
मायादिसर्थः ॥१७॥ न केवलमस्माकमेवैतादृगापत्स्यात्प्रायः पूर्वमिंद्रादिभिरपि प्राप्तास्ते वेसाह्यखंडल इति आखंडलः
सहस्राक्षः आसमंततः खंडयति रिपूनिति खडिभेदने आड् पूर्वो रस्मादृषादिभ्यः कलच् आखंडलः सहस्राक्ष इंद्र

आखंडलः पांडुसुतास्तव सिष्ठो नृपो हरिश्चंद्र इमे पुरा आसन् ॥ पुरः सरैर्नाकिनृपद्विजानां तैरप्यलंभि द्विषतामनर्म ॥
१७॥ तन्मूलविध्वंसकरं करिष्ये तच्छर्मणे साधनमार्य वंद्य ॥ निर्बर्हितस्वीयविपत्समूहं विहाय चिंतां भज वासुदेवं
१८॥
मरः पांडुसुता युधिष्ठिरादयः वसिष्ठोत्र सन्मनुः हरिश्चंद्रो नृपश्च ये इमे देवेंद्रादयः पूर्वमिति त्रिरोषः आसन् ॥
नाकिनो देवाश्च नृपा खंडमंडलस्थाश्च द्विजा द्विजातिसंस्कारवंतो ब्राह्मणाश्च तेषां पुरः सरैरग्रेसरैः तेः पूर्वोक्तैर्दे
वादिभिरपि द्विषतां शत्रुसंबंधि द्विषत्कृतमिसर्थः अनर्म अदुःखं अलंभि प्राप्तमभूत् कर्मणि लुड् तदास्माकं को
विचार इति भावः ॥१८॥ तदिति आर्य सज्जनो विप्रः पितायस्मात्तत्संबुद्धिः आर्यो सज्जनमवि दास्विसनेकार्थ सं ॥६॥

ग्रहेहैमः वप्रः पितरि केदारेवप्रः प्राकाररोधसो रितिरंतिदेवः आर्यतात इति पाठे आर्यश्चासौ तातश्च तत्संबुद्धिः असमस्तं स्वभावो
वायस्मात्तत्संबुद्धिः तव ग्रामस्तच्छर्मतस्मै तत्सुखार्थमिसर्थः तस्य दुःखस्य मूलानि मूलभूतानि असुरास्तेषां विध्वंसो
विनाशस्तं करोतीति तत्तथाभूतं साधनमुपायं करिष्ये निष्पादयिष्यामि यावत्तावदिति त्रिरोषः स्वीयाः स्वभक्तास्तेषां ये वि
पदां समूहास्ते निर्बर्हिता विनाशिता येन तं चिंता विहाय भज त्वं लक्ष्यः कथं चिंतां विना शयिष्यामीति मानुकीः पत
योवासुदेवः सर्वांतरात्मा तं ॥१९॥ स पत्नी भगवद्भजनं समुक्त्वा ततः किंचकारेसत आह सुधीरिति ततः वासुदेव भजनो

सुधीस्ततः सोपधि वैरिवर्गस्फुरल्लरक्तेश्च निर्बर्हणस्य ॥ स मंत्रजापं मरुदात्मजस्य समेस साकेतपुरं चकार ॥२०॥
पश्चात् अनंतरमिसर्थः सुधीः सुमतिः स धर्मदेवः साकेतपुरमयोध्यां समेस प्राप्य सह उपधिना कपटेन वर्त्तत इति
सोपधिः तेन सहेति तुल्ययोगे इति बहुव्रीहिः कपटो ऽस्त्री व्याजदंभोपधयश्छद्मकैतवमिसमरः सदासौ वैरिवर्गः शत्रु
समूहस्तस्य स्फुरल्लरक्तेत्सूतोऽप्यारोपः लक्तेश्चास्तस्य निर्बर्हणं प्रमापणं येन तस्य प्रमापणं निर्बर्हणमिसमरः मरुतः
प्राणस्यात्मजो हनुमांस्तस्य मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुदिति विक्रमादिसः मंत्रजापं मंत्रजपनं चकार
कृतवान् ॥२१॥ कलादीतिवर्षाणो देहस्य त्रिर्जीवनोपायः वर्षा देह इतिमेदिनी कलादिनामा संपादितायेनसः का

हरिसं.
॥१॥

सर्ग ५

पिकदाचिदपि अयो जलानि पिबन् क्वापि वातं पवनमपि पिबन् तथापि निराकुलात्मा अम्लानांतःकरणः अत्र
कृतोर्ध्ववाकुशितिपाठे प्रसिद्धोऽर्थः देदीप्याचभुक्तोवाकुशिरितिधनंजयः नभस्वद्वातपवनपवमानप्रभंजनाइत्यमरः प्रे
मयुतः स्नेहयुक्तः प्रेमानाप्रियताहार्दं स्नेहः प्रेमरतिस्तथेत्यमरः तं हनुमंतं अर्चयन् पूजयन् स्तवन् वाचा तत्स्तोत्र
पाठादिकुर्वन् एकपदे नैकपादेन पदं अवस्थित त्राणस्थानलक्ष्मांघ्रिवस्तुष्विसमरः तिष्ठन् मन् तं हनुमंतं भेजे सिषेवे
एतेनतत्तोषहेतुस्तपः पराकाष्ठोक्ता ॥३१॥ तदीयेति तस्येयं तदीयामावासोभक्तिर्येनेतितयातत्कृतेभजनेनेत्यर्थः प्र

फलादिसंपादितवर्ष्मद्युतिः पिबन्नपः क्वापि निराकुलात्मा ॥ तमर्चयन्प्रेमयुतोऽपिवातंभेजेस्तुवन्नेकपदेनतिष्ठन् ॥३१
तदीयभक्त्योपगतः प्रसत्तिं स्वप्ने प्रदत्तात्मशुभावलोकः ॥ मासद्वयांते स दयार्द्रचित्तस्तमित्यवोचत्स्वगुणैकचित्तम् ॥३२
वृंदावनं याहि सहोरुमित्रैः संगं गतान्नार्मवयोऽतिशांतिं ॥ भविष्यसे युक्तिमुदीर्य वाचं तत्र प्रियां तेन तिरोबभूवे ॥३३॥ सत्तिं
प्रसन्नतां उपगतः प्राप्तः स्वप्ने प्रदत्तः आत्मनः शुभावलोकः शोभनदर्शनं येन स तस्य मम धस्वशुभदर्शनः दययातदनित
यो दर्शनोसन्नया कृपयार्द्रं द्रवीभूतं चित्तं यस्य सः समारुतिः मासयोर्द्वयं मासद्वयं तस्यांते मासद्वयपर्यंतं कृतस्याराधना
नंतरमित्यर्थः प्रत्रामेत्रांगतावेवैकाच्छन्निर्यस्मात्तं नंधर्मदेवं इति वक्ष्यमाणप्रकारेण अवोचदब्रवीत् ॥३२॥ वृंदावनमिति उरु ॥१॥

णियानि मित्राणितैः सहसाकं संगं संगतिं अतिशांतिं च गतः नार्मवयोः सपुंजोयस्य सतथोक्तः सन् भविष्यसे
प्राप्स्यसि भूप्राप्तावात्मनेपदीति स्मरणात्प्राप्स्यर्थाद्भवतेर्लृट् तत्र वृंदावने इतीत्थम् प्रियावाचं युक्तिं वा गृणायुक्तिमि
त्यर्थः उदीर्य उक्त्वा तेन हनुमता तिरोबभूवे तिरोहितमभावि लिट् ॥३३॥ संप्रेष्येति सूनुं पुत्रं तस्य पुत्रस्य मातुलो मामकस्त
स्य सद्म गृहं संप्रेष्य मातुलगृहे पुत्रं प्रेषणं कृत्वेत्यर्थः विहितेति कृतं मारुतिप्रसन्नताहेतुभूतं नियमस्तस्य समाप्तिं
च कृत्वा पुष्पदो लोकस्य काले तद्वृंदावनं आप्नुवंतावधिगतौ नौ भक्तिधर्मौ व्रजवासिनां व्रजस्थानां कृपापक्षपातिनां

संप्रेष्य तन्मातुलसद्म सूनुं कृत्वा समाप्तिं विहितव्रतस्य ॥ तत्पुष्पदो लोकवदाप्नुवंतौ प्रियावभूतां व्रजवासिनां तौ ॥
३४॥ कृषिव्रजास्तत्र तदीक्षणेन प्रसन्नवक्त्राः परिरेभिरे तं ॥ परस्परं संस्तवमापुरेते हरीच्छया प्राक्तनजन्मबोधात् ॥३५॥

जनानां प्रियौ प्रसन्नताहेतुभूतौ अभूतां बभूवतुः ॥३४॥ कृषिव्रजाइति तत्र वृंदावने एते कृषिव्रजाः मुनिव्रजाः तयो
र्भक्तिधर्मयोरीक्षणं दर्शनं तेन प्रसन्नानि वक्त्राणि मुखानि येषां ते तथाभूताः संतः तं धर्मं परिरेभिरे आलिंगनं कृतवं
तः हरेः परमेश्वरस्य इच्छा संकल्पस्तया प्राग्भवं प्राक्तनं च तज्जन्म च तस्य बोधो ज्ञानं येषां ते तथोक्ताः परस्परं संस्तवं प
रिचयं संस्तवः स्यात्परिचय इत्यमरः आपुः ॥३५॥ उदीरयंत इति ते कृषिव्रजाः केन्नाम्ब्रुफ खानि च तेषु साम्यं समभा

तंपरस्परंसमानुभवनमित्यर्थः त्राणार्थीः त्रातुमागताः ततआगताःइत्यण पिंडुगणंजितादिनादीन् विपदोमहा
पदश्चसमेताबहुकालेनपरमेश्वरेणावृताः मर्त्यादिनादिनाएकीभावभाजःनदीश्यंतःमयेस्थंतत्रदुःखमनुभूतंम
यावत्तत्रामुनाप्रकारेणदुःखमनुभूतमितिवदंतः मंतःहरेरुपास्तिमुपासनांप्रकामम संतंप्रणिधानंचित्तेकाग्रंत
त्पूर्वंयथास्यात्तथाप्रणिधानंप्रयत्नस्यात्समाधौचप्रचेतातइतिमेदिनी प्रणयेनप्रेम्णाप्रणयःप्रसवेप्रेम्णीतिमे
दिनी चक्रुःअकुर्वन् ॥ ३६ ॥ मंत्रमिति ॥ धर्मोधर्मदेवः वासुदेवस्यश्रीकृष्णस्य अष्टौवर्णाः यस्यतंअष्टाक्षरमित्यर्थः

नदीश्यंतोविपदःसमेतास्तेत्राणार्थीःक्लेशाक्लेशेषुसाम्यं ॥ जपेप्रकामप्रणिधानपूर्वंहरेरुपास्तिंप्रणयेनचक्रुः ॥ ३६
मंत्रंधर्मोऽष्टवर्णंप्रतिदिनमजपद्वासुदेवस्यरासपंचाध्यायींचभक्तिःप्रमुदितहृदयामेऽपठत्सच्छ्रुतानि ॥ एका॰
दश्यांस्वमूर्तिंहरिरथसदयोऽदीदृशन्माधवस्यप्रीतस्तान्शुभ्रपक्षेद्युतिचयसहितांब्राह्मसंज्ञेमुहूर्ते ॥ ३७ ॥

मंत्रंप्रतिदिनमहर्निशं अजपज्जपतिस्म जाप प्रमुदितंहर्षितंहृदयंयस्याःसाभक्तिर्धर्मपत्नीरासपंचाध्यायीदशम
स्कंधेउक्तांरासप्रधानांपंचाध्यायसमाहृतिम् अपठत्पपाठ अस्मेकुक्षिपुत्राःसच्छ्रुतानिसच्छास्त्राणिवेदः
पारायणानिभागवतादीनिचक्रुरित्यर्थः अथैकस्यांधर्मादिकृतनसप्रसन्नताहेतुजपादिक्रियाप्रहसमनंतरंसदयो ॥८॥

दयालुर्हरिःमाधवस्यवैशाखमासस्यशुभ्रपक्षेशुक्लपक्षेएकादश्यांतिथौब्राह्ममितिसंज्ञानामयस्यतस्मि
न्मुहूर्तेप्रीतोऽतितुष्टःसन् द्युतिः कांतिस्तस्याश्चयःस्तसमूहस्तेनसहितांतेजःपुंजःपरीतामित्यर्थः स्वमूर्तिंनिजा
कृतिंतान्धर्मप्रमुखर्षिगणान्अदीदृशत्अतिप्रीसादर्शयामासेत्यर्थः हेतुमणिजंताद्दृशेर्लुङ् इत्तलक्षणं
पूर्वमुक्तं ॥ ३७ ॥ यःस्वमूर्तिमदीदृशत्तमनुवर्णयति सजलेत्यादिनाकालापकेनसजलःसद्यःसंभृतयानीयोज
लधरोमेघस्तेनोपमातुंयोग्योवर्णःरूपमसकृद्देशेयस्यतं वर्णोद्विजादिशुक्लादियशोगुणकथाभ्वनेतिमेदिनी॰

पुष्पिताग्रा

सजलजलधरोपमेयवर्णंस्फुरटपिशंगदुकूलरोचमानं ॥ विलसितशितिकंठबर्हमौलिंकरधृतवेणुमुदीरयंतम
त्राम् ॥ ३८ ॥ कलितललितचित्रस्थूलहारंदधतमुरूत्तमकौस्तुभंकंठे ॥ अलिकरुचिरचित्रकाभिरामंस्वविश्वा
दपार्वराग्नार्दशीश्वरास्यम् ॥ ३९ ॥
स्फुरत्सुवर्णेनकृष्णसितेनरंगेणपीतंदुकूलंक्षौमंमहावसनमितियावत् तेनरोचमानो
भ्राजमानस्तंस्फुरत्सुवर्णपुरटंभर्मकनकंहेममहाटकमित्यभिधानकोशः क्षौमंदुकूलंस्यादित्यमरः विलसितःशोभ
मानःशितिकंठबर्हाणांमयूरपिच्छानांमौलीरापीडोयस्यतं पिच्छबर्हेनपुंसकइत्यमरः करेधृतःसचासौवेणुश्चतं
मुदीरयंतंवादयंतंईशंसर्वनियंतारंश्रीकृष्णमन्वमन्निनितिचतुर्थेनान्वयः ॥ ३८ ॥ कलितेतिकलिताःपरिधृताः

ललिताः सुंदराः चित्रसूत्रानां विचित्रपुष्पाणां हाराः स्रजो येन तं उरसि महातुलमभ्यपयो कौस्तुभः कौस्तुभाख्यो मणि
स्तं कंठे रम्यगले दधतं धारयंतं अलिके ललाटे भाले इत्यर्थः रुचिरं चित्रकं तिलकं तेनाभिरामः सुंदरस्तं ललाट
मलिकं गोधिः तमालपत्रतिलकं चित्रकाणीति चामरः कपित्थादः कश्चेतः कौसुद्रिकः पर्वलितारहदपूर्णिमायां
भवउदितः इत्यर्थः तत्र भव इत्यण् शार्वरी शर्वरीत्वरो हिमांशुस्तद्वदाभ्यं कलंयस्य तं वक्त्रास्ये वदनं तुंडमाननं लपनं मुख
मित्यमरः ॥१९॥ विमलेति विमले विरजसी ये कमलपत्रे पद्मदले ते इव चारुणी नेत्रे यस्य तं रतियुताः प्रीतियुक्ता श्च

विमलकमलपत्रचारुनेत्रं रतियुतगोपवधूगणांतरस्थं॥ मणिगणवदलंकृतीर्दधानं कलललितलक्षणलक्षितप्र
तीकं॥२०॥ तरलमधुरवीक्षणं किशोरं श्रुतिविनतमंत्रगणैः समीक्ष्य वार्यं॥ प्रमुदितवदनाः प्रणुनुः सर्वे विहितकरां
जलयो नमन्मुनीन्द्राः॥२१॥
ता गोपवध्वो गोपांगनास्तासां गणाः समूहस्तेषामंतरे अंतः करणे तिष्ठतीति तं मणीनां
पद्मरागादीनां गणा विद्यंते अस्याः सा तद्वत्स्यास्ति अस्मिन्निति मतु विनिमतुपमाद्रुपधायाश्च मतोर्वोयवादिभ्य इति मस्य
वः ताश्चता अलंकृतयो अलंकारास्ताः दधानं धरतं कलतरं ललितानि यानि लक्षणानि सामुद्रिकोक्तानि महापुरु
षलक्षणानि तैर्लक्षिताः प्रतीकाः अवयवा यस्य तं अंगं प्रतीको ऽवयवोपघन इति प्रतिकूलप्रतीकं त्रिवेकदे 



शोचयुंत्यपमित्यमरः ॥२०॥ तरलेति तरलं चपलं मधुरं सुंदरं रसवदित्यर्थः वीक्षणमवलोकनं यस्य तं तरलं
चंचले इति मेदिनी मधुरं रसवदिति विश्वः किशोरं तरुणावस्थं श्रीकृष्णं समीक्ष्य दृष्ट्वा श्रुतिवृतानां ये मंत्रगणा
स्तैः आर्ह्यं पूर्वथान्नास्त्रं आसमं ततः संप्रणुनुस्तुषु सर्वे मुनीन्द्राः प्रमुदितानि वदनानि येषां ते विहितः कृतः करांजलिर्हि
स्तसंपुटो येस्ते तथा भूताः संतः अंजलिस्तु पुमान् हस्तसंपुट इति मेदिनी प्रणुनुः संस्तुवुः अनमन् आक्ष्मातत्व
माह्निप्रप्रणामाश्च कुरित्यर्थः ॥२१॥ अभीति तस्य धर्मदेवस्य पत्न्या मूर्तेः ऋषी इति तत्संज्ञौ हरिः कृष्णः सहन्तु मिच्छुः हरिः कृ

अभिलषितवरं शरणीश्च धर्मे हरिरवदन्तत्त्वार्मसंज्ञिदिर्ष्टुः॥ त्वमितिसकुरुतो ऽवनं विनीतत्रिदशसपत्नगणाद्दलं
तदङ्के॥२२॥ इति श्रीहरिसंभवे महाकाव्ये हर्यंके कविश्रीमदचिंसानंदवर्णिकृते रामानंदसाधिसमागमा
दिकथनं नाम पंचमः सर्गः॥५॥
इमः हे धर्म त्वमभिलषितं ईप्सितं श्रामो वरश्च समभिलषितवरं वरणीयमर्थं हे
वाञ्छते वर इत्यमरः शरणीश्च याचस्व इति अमुना प्रकारेण धर्मे धर्मसंज्ञाप्रसिद्धं ब्राह्मणं अवदत् स धर्मदेवो ऽपि हे
अनंत तदङ्के अपरिमितसामर्थ्य त्रिदशा देवास्तेषां सपत्नगणो ऽसुरवर्गस्तस्मात् नो ऽस्माकमवनं रक्षणं कुरु इ
ति विनीतो नम्रः सन्नवदत् अनेन सहितानां पूर्ववर्त्तिपंचश्लोकानां पुष्पिताग्रावृत्तम् अयुजि नयुगरेफतो

यकारोयुक्तिचनगौजरगाश्चपुष्पिताग्रेनिलक्षणात् ॥ ३३ ॥ इतिश्रीपदवाक्यप्रमाणपारावारीणधुरीणविश्व
नाथभट्टात्मजदीनानाथभट्टशिष्यप्रसक्तवासुदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमु
नितःप्रेरितमतिमाधवदाससत्सहायव्यासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृतौ
हरिसंभवकाव्यस्यविद्वज्जनाह्लादिन्याख्यायांपंचमसर्गः ॥ ५ ॥ लिं०रावलजेठाभाईराजीसंवत् १९
५६नामाहावदी २ द्वितीयानेभृगुवासरेमेंधाणग्रामेसमाप्ता ॥ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥